श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
ओं नमो भगवते वासुदेवाय

महर्षि वेदव्यासप्रणीतं श्रीमद्भागवतमहापुराणम्

# ॥ सप्तमस्कन्धे अष्टमोऽध्यायः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

# श्रीमद्भागवतमहापुराणम्

# ॥ सप्तमस्कन्धे अष्टमोऽध्यायः ॥

नारद उवाच

अथ दैत्यसुताः सर्वे श्रुत्वा तदनुवर्णितम्।
जगृहुर्निरवद्यत्वान्नैव गुर्वनुशिक्षितम्॥ 1 ॥

अथाचार्यसुतस्तेषां बुद्धिमेकान्तसंस्थिताम्।
आलक्ष्य भीतस्त्वरितो राज्ञ आवेदयद् यथा॥ 2 ॥

श्रुत्वा तदप्रियं दैत्यो दुःसहं तनयानयम्।
कोपावेशचलद्गात्रः पुत्रं हन्तुं मनो दधे॥ 3 ॥

क्षिप्त्वा परुषया वाचा प्रह्लादमतदर्हणम्।
आहेक्षमाणः पापेन तिरश्चीनेन चक्षुषा॥ 4 ॥

प्रश्रयावनतं दान्तं बद्धाञ्जलिमवस्थितम्।
सर्पः पदाहत इव श्वसन्प्रकृतिदारुणः॥ 5 ॥

हे दुर्विनीत मन्दात्मन्कुलभेदकराधम।
स्तब्धं मच्छासनोद्धूतं नेष्ये त्वाद्य यमक्षयम्॥ 6 ॥

क्रुद्धस्य यस्य कम्पन्ते त्रयो लोकाः सहेश्वराः।
तस्य मेऽभीतवन्मूढ शासनं किं बलोऽत्यगाः॥ 7 ॥

प्रह्लाद उवाच
न केवलं मे भवतश्च राजन्
    स वै बलं बलिनां चापरेषाम्।
परेऽवरेऽमी स्थिरजङ्गमा ये
    ब्रह्मादयो येन वशं प्रणीताः॥ **8**॥

स ईश्वरः काल उरुक्रमोऽसा -
    वोजःसहःसत्त्वबलेन्द्रियात्मा।
स एव विश्वं परमः स्वशक्तिभिः
    सृजत्यवत्यत्ति गुणत्रयेशः॥ **9**॥

जह्यासुरं भावमिमं त्वमात्मनः
    समं मनो धत्स्व न सन्ति विद्विषः।
ऋतेऽजितादात्मन उत्पथस्थितात्
    तद्धि ह्यनन्तस्य महत् समर्हणम्॥ **10**॥

दस्यून्पुरा षण्ण विजित्य लुम्पतो
    मन्यन्त एके स्वजिता दिशो दश।
जितात्मनो ज्ञस्य समस्य देहिनां
    साधोः स्वमोहप्रभवाः कुतः परे॥ **11**॥

हिरण्यकशिपुरुवाच
व्यक्तं त्वं मर्तुकामोऽसि योऽतिमात्रं विकत्थसे।
मुमूर्षूणां हि मन्दात्मन् ननु स्युर्विप्लवा गिरः॥ **12**॥

यस्त्वया मन्दभाग्योक्तो मदन्यो जगदीश्वरः।
क्वासौ यदि स सर्वत्र कस्मात् स्तम्भे न दृश्यते॥ **13**॥

सोऽहं विकत्थमानस्य शिरः कायाद्धरामि ते।
गोपायेत हरिस्त्वाद्य यस्ते शरणमीप्सितम्॥ **14**॥

एवं दुरुक्तैर्मुहुरर्दयन्रुषा
सुतं महाभागवतं महासुरः।
खड्गं प्रगृह्योत्पतितो वरासनात्
स्तम्भं तताडातिबलः स्वमुष्टिना॥ 15॥

तदैव तस्मिन् निनदोऽतिभीषणो
बभूव येनाण्डकटाहमस्फुटत्।
यं वै स्वधिष्ण्योपगतं त्वजादयः
श्रुत्वा स्वधामाप्ययमङ्ग मेनिरे॥ 16॥

स विक्रमन् पुत्रवधेप्सुरोजसा
निशम्य निर्ह्रादमपूर्वमद्भुतम्।
अन्तःसभायां न ददर्श तत्पदं
वितत्रसुर्येन सुरारियूथपाः॥ 17॥

सत्यं विधातुं निजभृत्यभाषितं
व्याप्तिं च भूतेष्वखिलेषु चात्मनः।
अदृश्यतात्यद्भुतरूपमुद्वहन्
स्तम्भे सभायां न मृगं न मानुषम्॥ 18॥

स सत्त्वमेनं परितोऽपि पश्यन्
स्तम्भस्य मध्यादनु निर्जिहानम्।
नायं मृगो नापि नरो विचित्र -
महो किमेतन्नृमृगेन्द्ररूपम्॥ 19॥

मीमांसमानस्य समुत्थितोऽग्रतो
नृसिंहरूपस्तदलं भयानकम्।
प्रतप्तचामीकरचण्डलोचनं
स्फुरत्सटाकेसरजृम्भिताननम्॥ 20॥

करालदंष्ट्रं करवालचञ्चल -
    क्षुरान्तजिह्वं भ्रुकुटीमुखोल्बणम्।
स्तब्धोर्ध्वकर्णं गिरिकन्दराद्भुत -
    व्यात्तास्यनासं हनुभेदभीषणम्॥ **21** ॥

दिविस्पृशत्कायमदीर्घपीवर -
    ग्रीवोरुवक्षःस्थलमल्पमध्यमम्।
चन्द्रांशुगौरैश्छुरितं तनूरुहै -
    र्विष्वग्भुजानीकशतं नखायुधम्॥ **22** ॥

दुरासदं सर्वनिजेतरायुध -
    प्रवेकविद्रावितदैत्यदानवम्।
प्रायेण मेऽयं हरिणोरुमायिना
    वधः स्मृतोऽनेन समुद्यतेन किम्॥ **23** ॥

एवं ब्रुवंस्त्वभ्यपतद् गदायुधो
    नदन् नृसिंहं प्रति दैत्यकुञ्जरः।
अलक्षितोऽग्नौ पतितः पतङ्गमो
    यथा नृसिंहौजसि सोऽसुरस्तदा॥ **24** ॥

न तद् विचित्रं खलु सत्त्वधामनि
    स्वतेजसा यो नु पुरापिबत् तमः।
ततोऽभिपद्याभ्यहनन्महासुरो
    रुषा नृसिंहं गदयोरुवेगया॥ **25** ॥

तं विक्रमन्तं सगदं गदाधरो
    महोरगं तार्क्ष्यसुतो यथाग्रहीत्।
स तस्य हस्तोत्कलितस्तदासुरो
    विक्रीडतो यद्वदहिर्गरुत्मतः॥ **26** ॥

असाध्वमन्यन्त हृतौकसोऽमरा
    घनच्छदा भारत सर्वधिष्ण्यपाः।
तं मन्यमानो निजवीर्यशङ्कितं
    यद्धस्तमुक्तो नृहरिं महासुरः।
पुनस्तमासज्जत खड्गचर्मणी
    प्रगृह्य वेगेन जितश्रमो मृधे॥ 27॥

तं श्येनवेगं शतचन्द्रवर्त्मभि -
    श्चरन्तमच्छिद्रमुपर्यधो हरिः।
कृत्वाट्टहासं खरमुत्स्वनोल्बणं
    निमीलिताक्षं जगृहे महाजवः॥ 28॥

विष्वक्स्फुरन्तं ग्रहणातुरं हरि -
    र्व्यालो यथाऽऽखुं कुलिशाक्षतत्वचम्।
द्वार्यूर आपात्य ददार लीलया
    नखैर्यथाहिं गरुडो महाविषम्॥ 29॥

संरम्भदुष्प्रेक्ष्यकराललोचनो
    व्यात्ताननान्तं विलिहन्स्वजिह्वया।
असृग्लवाक्तारुणकेसराननो
    यथान्त्रमाली द्विपहत्यया हरिः॥ 30॥

नखाङ्कुरोत्पाटितहृत्सरोरुहं
    विसृज्य तस्यानुचरानुदायुधान्।
अहन् समन्तान्नखशस्त्रपार्ष्णिभि -
    र्दोर्दण्डयूथोऽनुपथान् सहस्रशः॥ 31॥

सटावधूता जलदाः परापतन्
    ग्रहाश्च तद्दृष्टिविमुष्टरोचिषः।

अम्भोधयः श्वासहता विचुक्षुभु -
    र्निर्ह्रादभीता दिगिभा विचुक्रुशुः ॥ 32 ॥

द्यौस्तत्सटोत्क्षिप्तविमानसङ्कुला
    प्रोत्सर्पत क्ष्मा च पदातिपीडिता।
शैलाः समुत्पेतुरमुष्य रंहसा
    तत्तेजसा खं ककुभो न रेजिरे ॥ 33 ॥

ततः सभायामुपविष्टमुत्तमे
    नृपासने सम्भृततेजसं विभुम्।
अलक्षितद्वैरथमत्यमर्षणं
    प्रचण्डवक्त्रं न बभाज कश्चन ॥ 34 ॥

निशाम्य लोकत्रयमस्तकज्वरं
    तमादिदैत्यं हरिणा हतं मृधे।
प्रहर्षवेगोत्कलितानना मुहुः
    प्रसूनवर्षैर्ववृषुः सुरस्त्रियः ॥ 35 ॥

तदा विमानावलिभिर्नभस्तलं
    दिदृक्षतां सङ्कुलमास नाकिनाम्।
सुरानका दुन्दुभयोऽथ जघ्निरे
    गन्धर्वमुख्या ननृतुर्जगुः स्त्रियः ॥ 36 ॥

तत्रोपव्रज्य विबुधा ब्रह्मेन्द्रगिरिशादयः।
ऋषयः पितरः सिद्धा विद्याधरमहोरगाः ॥ 37 ॥

मनवः प्रजानां पतयो गन्धर्वाप्सरचारणाः।
यक्षाः किम्पुरुषास्तात वेतालाः सिद्धकिन्नराः ॥ 38 ॥

ते विष्णुपार्षदाः सर्वे सुनन्दकुमुदादयः।
मूर्ध्नि बद्धाञ्जलिपुटा आसीनं तीव्रतेजसम्।
ईडिरे नरशार्दुलं नातिदूरचराः पृथक्॥ **39** ॥

ब्रह्मोवाच
नतोऽस्म्यनन्ताय दुरन्तशक्तये
    विचित्रवीर्याय पवित्रकर्मणे।
विश्वस्य सर्गस्थितिसंयमान् गुणैः
    स्वलीलया सन्दधतेऽव्ययात्मने॥ **40** ॥

श्रीरुद्र उवाच
कोपकालो युगान्तस्ते हतोऽयमसुरोऽल्पकः।
तत्सुतं पाह्युपसृतं भक्तं ते भक्तवत्सल॥ **41** ॥

इन्द्र उवाच
प्रत्यानीताः परम भवता त्रायता नः स्वभागा
    दैत्याक्रान्तं हृदयकमलं त्वद्गृहं प्रत्यबोधि।
कालग्रस्तं कियदिदमहो नाथ शुश्रूषतां ते
    मुक्तिस्तेषां न हि बहुमता नारसिंहापरैः किम्॥ **42** ॥

ऋषय ऊचुः
त्वं नस्तपः परममात्थ यदात्मतेजो
    येनेदमादिपुरुषात्मगतं ससर्ज।
तद् विप्रलुप्तममुनाद्य शरण्यपाल
    रक्षागृहीतवपुषा पुनरन्वमंस्थाः॥ **43** ॥

पितर ऊचुः
श्राद्धानि नोऽधिबुभुजे प्रसभं तनूजै -
    र्दत्तानि तीर्थसमयेऽप्यपिबत् तिलाम्बु।

तस्योदरान्नखविदीर्णवपाद् य आर्च्छत्
तस्मै नमो नृहरयेऽखिलधर्मगोप्त्रे ॥ **44** ॥

सिद्धा ऊचुः
यो नो गतिं योगसिद्धामसाधु -
रहार्षीद् योगतपोबलेन।
नानादर्पं तं नखैर्निर्ददार
तस्मै तुभ्यं प्रणताः स्मो नृसिंह ॥ **45** ॥

विद्याधरा ऊचुः
विद्यां पृथग्धारणयानुराद्धां
न्यषेधदज्ञो बलवीर्यदृप्तः।
स येन सङ्ख्ये पशुवद्धतस्तं
मायानृसिंहं प्रणताः स्म नित्यम् ॥ **46** ॥

नागा ऊचुः
येन पापेन रत्नानि स्त्रीरत्नानि हृतानि नः।
तद्वक्षःपाटनेनासां दत्तानन्द नमोऽस्तु ते ॥ **47** ॥

मनव ऊचुः
मनवो वयं तव निदेशकारिणो
दितिजेन देव परिभूतसेतवः।
भवता खलः स उपसंहृतः प्रभो
करवाम ते किमनुशाधि किङ्करान् ॥ **48** ॥

प्रजापतय ऊचुः
प्रजेशा वयं ते परेशाभिसृष्टा
न येन प्रजा वै सृजामो निषिद्धाः।

स एष त्वया भिन्नवक्षा नु शेते
जगन्मङ्गलं सत्त्वमूर्तेऽवतारः ॥ 49 ॥

गन्धर्वा ऊचुः
वयं विभो ते नटनाट्यगायका
येनात्मसाद् वीर्यबलौजसा कृताः।
स एष नीतो भवता दशामिमां
किमुत्पथस्थः कुशलाय कल्पते ॥ 50 ॥

चारणा ऊचुः
हरे तवाङ्घ्रिपङ्कजं भवापवर्गमाश्रिताः।
यदेष साधुहृच्छयस्त्वयासुरः समापितः ॥ 51 ॥

यक्षा ऊचुः
वयमनुचरमुख्याः कर्मभिस्ते मनोज्ञै -
स्त इह दितिसुतेन प्रापिता वाहकत्वम्।
स तु जनपरितापं तत्कृतं जानता ते
नरहर उपनीतः पञ्चतां पञ्चविंश ॥ 52 ॥

किम्पुरुषा ऊचुः
वयं किम्पुरुषास्त्वं तु महापुरुष ईश्वरः।
अयं कुपुरुषो नष्टो धिक्कृतः साधुभिर्यदा ॥ 53 ॥

वैतालिका ऊचुः
सभासु सत्रेषु तवामलं यशो
गीत्वा सपर्यां महतीं लभामहे।
यस्तां व्यनैषीद् भृशमेष दुर्जनो
दिष्ट्या हतस्ते भगवन्यथाऽऽमयः ॥ 54 ॥

किन्नरा ऊचुः
वयमीश किन्नरगणास्तवानुगा
दितिजेन विष्टिममुनानु कारिताः।
भवता हरे स वृजिनोऽवसादितो
नरसिंह नाथ विभवाय नो भव॥ **55**॥

विष्णुपार्षदा ऊचुः
अद्यैतद्धरिनररूपमद्भुतं ते
दृष्टं नः शरणद सर्वलोकशर्म।
सोऽयं ते विधिकर ईश विप्रशप्त -
स्तस्येदं निधनमनुग्रहाय विद्मः॥ **56**॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
सप्तमस्कन्धे प्रह्लादानुचरिते दैत्यराजवधे
नरसिंहस्तवो नाम अष्टमोऽध्यायः॥